# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः - 30-01-2022 अङ्काः - 100

पूर्वाह्णे – 10:00वादनतः 1:00 वादनपर्यन्तम् समयः – घण्टात्रयम्

<u>सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि</u>

**1 पञ्चानां एकवाक्येन उत्तरं लिखत ।** **5**

१. दमयन्तीस्वयंवरनिश्चयकाले सुधर्मां कौ प्रविष्टौ ?

२. भगवतः जन्मकर्मणोः को हेतुः ?

३. आनन्दगिरिः कः ?

४. यज्ञसेनः कः? कश्च तस्मै दिव्यं चक्षुः विततार ?

५. भर्तृहरिविरचितं शतकत्रयं किम् ?

६. 'रघोरौदार्यम्' इति पाठः कस्मात् काव्यात् कस्मात् च सर्गात् उद्धृतः ?

७. कौशाम्बी नाम नगरी कस्मिन् जनपदे अस्ति ?

८. श्रीशङ्कराचार्याः कस्मिन् लग्ने जाताः ?

**2 पञ्चानां त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **10**

१. सत्पुरुषाः, सामान्याः, मानुषराक्षसाः इतरे च के ? विशदयत।

२. धार्तराष्ट्रः पुरोचनं रहसि ससान्त्वं किम् अभाषत ?

३. महर्षिः कौत्सः प्रजेश्वरं करेण स्पृशन् किम् उवाच ?

४. कीदृशाः मुनयः जगद्गुरुं मानयित्वा कीदृशं फलमद्य विपक्वम् इति ऊचुः ?

५. सहस्रानीकः कः? तं देवेन्द्रः किमुवाच ?

६. देवाः नलाय कान् कान् वरान् ददुः ?

७. शङ्करावतारसमये किं किम् अभूत् ?

**3 द्वयोः विस्तरेण (सप्ताष्टभिर्वाक्यैः) उत्तरं लिखत ।** **8**

१. वाल्मीकिकृतं चन्द्रोदयवर्णनं विवृणुत ।

२. कालिदासकृतां ब्रह्मस्तुतिं सङ्क्षेपेण विशदयत ।

३. भगवता व्यासेन उक्तो द्रौपद्याः पूर्ववृत्तान्तो वर्ण्यताम् ।

४. गिरिः कः ? सः गुरुसेवां कथं विदधे ?

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** **9**

१. विशिष्टयोः सम्बन्धो हि गुणवान् भवति ।

२. त्वस्त्वेकः सकलविदित्युवाच विप्रः ।

३. मा भूत् परीवादनवावतारः ।

४. प्रत्यपद्यत च सद्य एव यौवनम् ।

५. भगवन्नस्ति मे भवतः सूत्रभाष्यस्य वार्तिककरणाभिलाषः ।

**5 द्वयोः भावं विशदयत ।** **8**

१. यः प्रीणयेत् सुचरितैः पितरं स पुत्रो यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यद् एतत्त्रयं जगति पुण्यकृतो लभन्ते ॥

२. जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिस्स्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥

३. सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् ।
सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम् ॥

४. सार्थास्यां व्यजयत गुर्विणीति वाणी वर्धिष्णुर्भुवनगुरुर्यतो विवेश ।
अङ्गानामथ कृशतां विलोक्य लोकः क्षीणत्वं भुवि बुबुधे परेषु भावि ॥

**6 श्लोकमेकं पूर्णं लिखत ।** **4**

१. यावत् .................. कीदृशः ॥

२. व्याघ्रीव ...................... चित्रम् ॥

**7 एकस्य कवेः देशकालकृतिमहत्त्वादीनाम् विषये लिखत ।** **4**

१. कृष्णशास्त्री        २. लक्ष्मणसूरिः

**8 एकस्य लघुटिप्पणीं लिखत ।** **4**

१. भीमस्य पराक्रमः        २. उदयनस्य औदार्यम्

**9 चत्वारि पदानि वाक्ये योजयत ।** **4**

१. शीतांशुः २. पयोनिधिः ३. आश्रुत्य

४. विशाम्पतिः ५. अहर्निशम् ६. चकास्ति

**10 चतुर्णां रूपाणि विवेचयत ।** 4

१. सव्यसाचिना २. वर्तेथाः ३. पाराशर्यः

४. अधीयानाः ५. उपरोद्धुम् ६. अभूत्

**11 चतुर्णां पर्यायपदानि लिखत ।** **4**

१. दाशेयी २. मृगादनः ३. ईड्यम्

४. पुष्करः ५. सप्तार्चिः ६. कन्दरः

**12 चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** **4**

१. प्राप्तयौवनः २. वर्त्मान्तरम् ३. वाक्कलहः

४. चक्षुःश्रोत्रम् ५. त्रिभुवनम् ६. यथागतम्

**13 चतुर्णां सन्धिं विभज्य नाम लिखत ।** **4**

१. गुरोरधीयन् २. विहरन्नासीत् ३. त्वस्त्वेकः

४ त्वय्यशुभम् ५. उपस्थितांस्तावत् ६. तेऽमी

**14 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** **6**

१. त्यक्ष्यति २. ववृधे ३. रोचते ४. गन्ता

**15 द्वयोः व्याकरणविशेषं लिखत ।** **4**

१. समञ्चति स्म २. मा शुचः ३. महाराजः ४. हैडिम्बेयः

**16 समासमेकं सलक्षणं विशदयत ।** **4**

१. अव्ययीभावसमासः २. बहुव्रीहिसमासः

**17 चतुर्थं पदं लिखत ।** **4**

| | | | | | | |
|---|---|---|---|---|---|---|
| १. | रघुवंशम् | – कालिदासः | :: | भारतसङ्ग्रहः | – | ____________ |
| २. | शान्तनवः | – भीष्मः | :: | कौन्तेयः | – | ____________ |
| ३. | अभिमन्युः | – जनमेजयः | :: | परीक्षित् | – | ____________ |
| ४. | भोजनार्थम् | – तत्पुरुषः | :: | केशाकेशि | – | ____________ |

**18 इतरवचने लिखत ।** **4**

| | | | | |
|---|---|---|---|---|
| १. | दुर्वासाः | _________ | _________ । |
| २. | राज्ञा | _________ | _________ । |
| ३. | _________ | भवन्तौ | _________। |
| ४. | _________ | _________ | आहुः। |

**19 रिक्तस्थानानि पूरयत ।** **4**

१. नेदं मांसपिण्डमपि तु सप्राणा ________________ ।

२. विराजतेऽद्यापि सा ________________ ।

३. स्त्रीणां ________________ हि निपुणता।

४. प्रायः _____________पदार्थप्रधानः तत्पुरुषः ।

**20 प्रयोगपरिवर्तनं कुरुत ।** **2**

१. त्वम् अनन्यगतिकं मां नरकात् त्रायस्व।

२. पित्रा तस्य शुश्रूषार्थम् अहं नियोजिता ।

-------------------------